
श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્દ્ભાગવત રસિક કુટુંબ

## UG-11.19 - ચતુર્થ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.
દેવીં(મ્) સરસ્વતીં(વઁ) વ્યાસં(ન્), તતો જયમુદીરયેત્.

નામસઙ્કીર્તનં(યઁ) યસ્ય, સર્વપાપપ્રણાશનમ્.
પ્રણામો દુ:ખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.

શ્રીમદ્ભાગવતમહાપુરાણમ્

એકાદશઃ સ્કન્ધઃ

.. અથૈકોનવિં(મ્)શોઽધ્યાયઃ

**શ્રીભગવાનુવાચ**

યો વિદ્યાશ્રુતસમ્પન્ન, આત્મવાન્ નાનુમાનિકઃ .
માયામાત્રમિદં(ઞ્) જ્ઞાત્વા, જ્ઞાનં(ઞ્) ચ મયિ સં(ન્)ન્યસેત્ .. ૧..

વિદ્યા + શ્રુત + સમ્પન્ન

જ્ઞાનિનસ્ત્વહમેવેષ્ટઃ(સ્), સ્વાર્થો હેતુશ્ચ સં(મ્)મતઃ .
સ્વર્ગશ્ચૈવાપવર્ગશ્ચ, નાન્યોઽર્થો મદૃતે પ્રિયઃ .. ૨..

જ્ઞાનિનસ્ + ત્વ + હમેવેષ્ટઃ(સ્), સ્વર્ગશ્ + ચૈવા + પવર્ગશ્ચ

જ્ઞાનવિજ્ઞાનસં(મ્)સિદ્ધાઃ(ફ્), પદં(મ્) શ્રેષ્ઠં(વઁ) વિદુર્મમ .
જ્ઞાની પ્રિયતમોઽતો મે, જ્ઞાનેનાસૌ બિભર્તિ મામ્ .. ૩..

જ્ઞાનવિજ્ઞા + નસં(મ્)સિદ્ધાઃ(ફ્)

તપસ્તીર્થં(ઞ્) જપો દાનં(મ્) પવિત્રાણીતરાણિ ચ .
નાલં(ઙ્) કુર્વન્તિ તાં(મ્) સિદ્ધિં(યઁ), યા જ્ઞાનકલયા કૃતા .. ૪..

પવિત્રાણી + તરાણિ

તસ્માજ્જ્ઞાનેન સહિતં(ઞ્), જ્ઞાત્વા સ્વાત્માનમુદ્ધવ .
જ્ઞાનવિજ્ઞાનસમ્પન્નો, ભજ માં(મ્) ભક્તિભાવિતઃ .. ૫..

સ્વાત્મા + નમુદ્ધવ

જ્ઞાનવિજ્ઞાનયજ્ઞેન, મામિષ્ટ્વાઽઽત્માનમાત્મનિ .
સર્વયજ્ઞપતિં(મ્) માં(વ઼ઁ) વૈ, સં(મ્)સિદ્ધિં(મ્) મુનયોઽગમન્ .. ૬..

જ્ઞાનવિજ્ઞા + નયજ્ઞેન ,

મામિષ્ટ્વાઽઽત્મા + નમાત્મનિ

ત્વય્યુદ્ધવાશ્રયતિ યસ્ત્રિવિધો વિકારો,
માયાન્તરાઽઽપતતિ નાદ્યપવર્ગયોર્યત્ .
જન્માદયોઽસ્ય યદમી તવ તસ્ય કિં(મ્) સ્યુ-
રાદ્યન્તયોર્યદસતોઽસ્તિ તદેવ મધ્યે .. ૭..

ત્વય્યુદ્ + ધવાશ્રયતિ , માયાન્તરાઽઽ + પતતિ

ના + દ્યપવર્ગ + યોર્યત્ ,

રાદ્યન્ + તયોર્ + યદ + સતોઽસ્તિ

ઉદ્ધવ ઉવાચ

જ્ઞાનં(વ઼ઁ) વિશુદ્ધં(વ઼ઁ) વિપુલં(યઁ) યથૈતદ્-
વૈરાગ્યવિજ્ઞાનયુતં(મ્) પુરાણમ્ .
આખ્યાહિ વિશ્વેશ્વર વિશ્વમૂર્તે,
ત્વદ્ભક્તિયોગં(ઞ્) ચ મહદ્વિમૃગ્યમ્ .. ૮..

વૈરાગ્ય + વિજ્ઞા + નયુતં(મ્),

ત્વદ્ + ભક્તિ + યોગં(ઞ્) ,મહદ્ + વિમૃગ્યમ્

તાપત્રયેણાભિહતસ્ય ઘોરે,

સં(ન્)તપ્યમાનસ્ય ભવાધ્વનીશ .

પશ્યામિ નાન્યચ્છરણં(ન્) તવાઙ્ઘ્રિ-

દ્વન્દ્વાતપત્રાદમૃતાભિવર્ષાત્ .. ૯..

તાપત્રયેણા + ભિહતસ્ય , દ્વન્દ્વા + તપત્રા + દમૃતા + ભિવર્ષાત્

દૃષ્ટં(ઞ્) જનં(મ્) સં(મ્)પતિતં(મ્) બિલેઽસ્મિન્

કાલાહિના ક્ષુદ્રસુખોરુતર્ષમ્ .

સમુદ્ધરૈનં(ઙ્) કૃપયાઽઽપવર્ગ્યૈર્

વચોભિરાસિઞ્ચ મહાનુભાવ .. ૧૦..

ક્ષુદ્ર + સુખો + રુતર્ષમ્ , સમુદ્ + ધરૈનં(ઙ્)

શ્રીભગવાનુવાચ

ઇત્થમેતત્ પુરા રાજા, ભીષ્મં(ન્) ધર્મભૃતાં(વઁ) વરમ્ .

અજાતશત્રુઃ(ફ્) પપ્રચ્છ, સર્વેષાં(ન્) નોઽનુશૃણ્વતામ્ .. ૧૧..

નોઽનુ + શૃણ્વતામ્

નિવૃત્તે ભારતે યુદ્ધે, સુહૃન્નિધનવિહ્વલઃ .

શ્રુત્વા ધર્માન્ બહૂન્ પશ્ચાન્ -મોક્ષધર્માનપૃચ્છત .. ૧૨..

સુહૃન્ + નિધન + વિહ્વલઃ, મોક્ષધર્મા + નપૃચ્છત

તાનહં(ન્) તેઽભિધાસ્યામિ, દેવવ્રતમુખાચ્છ્રુતાન્ .

જ્ઞાનવૈરાગ્યવિજ્ઞાન-શ્રદ્ધાભક્ત્યુપબૃં(મ્)હિતાન્ .. ૧૩..

દેવ + વ્રતમુ + ખાચ્છ્રુતાન્ ,

શ્રદ્ધા + ભક્ત્યુ + પબૃં(મ્)હિતાન્

નવૈકાદશ પં(ઞ્)ચ ત્રીન્, ભાવાન્ ભૂતેષુ યેન વૈ .

ઈક્ષેતાથૈકમપ્યેષુ, તજ્જ્ઞાનં(મ્) મમ નિશ્ચિતમ્ .. ૧૪..

ઈક્ષેતા + થૈક + મપ્યેષુ

એતદેવ હિ વિજ્ઞાનં(ન્), ન તથૈકેન યેન યત્ .
સ્થિત્યુત્પત્ત્યપ્યયાન્ પશ્યેદ્, ભાવાનાં(ન્) ત્રિગુણાત્મનામ્ .. ૧૫..

સ્થિત્યુત્ + પત્ત્યપ્ + યયાન્ ,ત્રિગુણાત્ + મનામ્

આદાવન્તે ચ મધ્યે ચ, સૃજ્યાત્ સૃજ્યં(યઁ) યદન્વિયાત્ .
પુનસ્તત્પ્રતિસં(ઙ્)ક્રામે, યચ્છિષ્યેત તદેવ સત્ .. ૧૬..

પુનસ્તત્ + પ્રતિસં(ઙ્)ક્રામે

શ્રુતિઃ(ફ્) પ્રત્યક્ષમૈતિહ્ય-મનુમાનં(ઞ્) ચતુષ્ટયમ્ .
પ્રમાણેષ્વનવસ્થાનાદ્, વિકલ્પાત્ સ વિરજ્યતે .. ૧૭..

પ્રમાણેષ્વ + નવસ્થાનાદ્

કર્મણાં(મ્) પરિણામિત્વા-દાવિરિ(ઞ્) ચાદમં(ઙ્)ગલમ્ .
વિપશ્ચિન્નશ્વરં(મ્) પશ્યે- દદૃષ્ટમપિ દૃષ્ટવત્ .. ૧૮..

દાવિરિ(ઞ્)ચા + દમં(ઙ્)ગલમ્ , વિપશ્ચિન્ + નશ્વરં(મ્)

ભક્તિયોગઃ(ફ્) પુરૈવોક્તઃ(ફ્) પ્રીયમાણાય તેઽનઘ .
પુનશ્ચ કથયિષ્યામિ, મદ્ભક્તેઃ(ખ્) કારણં(મ્) પરમ્ .. ૧૯..

શ્રદ્ધામૃતકથાયાં(મ્) મે, શશ્વન્મદનુકીર્તનમ્ .
પરિનિષ્ઠા ચ પૂજાયાં(મ્), સ્તુતિભિઃ(સ્) સ્તવનં(મ્) મમ .. ૨૦..

શ્રદ્ધામૃ + તકથાયાં(મ્), શશ્વન્ + મદનુકીર્તનમ્

આદરઃ(ફ્) પરિચર્યાયાં(મ્), સર્વાઙ્ગૈરભિવન્દનમ્ .
મદ્ભક્તપૂજાભ્યધિકા, સર્વભૂતેષુ મન્મતિઃ .. ૨૧..

સર્વાઙ્ગૈ + રભિવન્દનમ્ , મદ્ભક્ત + પૂજાભ્ + યધિકા

મદર્થેષ્વમં(ઙ્)ગચેષ્ટા ચ, વચસા મદ્ગુણેરણમ્ .
મય્યર્પણં(ઞ્) ચ મનસઃ(સ્),સર્વકામવિવર્જનમ્ .. ૨૨..

મદર્થેષ્વમં(ઙ્) + ગચેષ્ટા, સર્વકા + મવિવર્જનમ્

મદર્થેઽર્થપરિત્યાગો, ભોગસ્ય ચ સુખસ્ય ચ .

ઇષ્ટં(ન્) દત્તં(મ્) હુતં(ઞ્) જપં(મ્) મદર્થ(યઁ) યદ્ વ્રતં(ન્) તપઃ .. ૨૩..

મદર્થેઽર્થ + પરિત્યાગો

એવં(ન્) ધર્મૈર્મનુષ્યાણા-મુદ્ધવાત્મનિવેદિનામ્ .

મયિ સં(ઞ્)જાયતે ભક્તિઃ(ખ્), કોઽન્યોઽર્થોઽસ્યાવશિષ્યતે .. ૨૪..

ધર્મૈર્ + મનુષ્યાણા, મુદ્+ ધવાત્ + મનિવેદિનામ્

કોઽન્યોઽર્થોઽસ્ + યાવશિષ્યતે

યદાઽઽત્મન્યર્પિતં(ઞ્) ચિત્તં(મ્), શાન્તં(મ્) સત્ત્વોપબૃં(મ્)હિતમ્ .

ધર્મં(ઞ્) જ્ઞાનં(મ્) સવૈરાગ્ય-મૈશ્વર્યં(ઞ્) ચાભિપદ્યતે .. ૨૫..

યદાઽઽત્ + મન્યર્પિતં(ઞ્), સત્ત્વો + પબૃં(મ્)હિતમ્

યદર્પિતં(ન્) તદ્ વિકલ્પે, ઇન્દ્રિયૈઃ(ફ્) પરિધાવતિ .

રજસ્વલં(ઞ્) ચાસન્નિષ્ઠં(ઞ્), ચિત્તં(વઁ) વિદ્ધિ વિપર્યયમ્ .. ૨૬..

ચાસન્ + નિષ્ઠં(ઞ્)

ધર્મો મદ્ભક્તિકૃત્ પ્રોક્તો, જ્ઞાનં(ઞ્) ચૈકાત્મ્યદર્શનમ્ .

ગુણેષ્વસં(ઙ્)ગો વૈરાગ્ય-મૈશ્વર્યં(ઞ્) ચાણિમાદયઃ .. ૨૭..

ચૈકાત્મ્ય + દર્શનમ્ , ગુણેષ્વ + સં(ઙ્)ગો

ઉદ્ધવ ઉવાચ

યમઃ(ખ્) કતિવિધઃ(ફ્) પ્રોક્તો, નિયમો વારિકર્શન .

કઃ(શ્) શમઃ(ખ્) કો દમઃ(ખ્) કૃષ્ણ, કા તિતિક્ષા ધૃતિઃ(ફ્) પ્રભો .. ૨૮..

કિં(ન્) દાનં(ઙ્) કિં(ન્) તપઃ(શ્) શૌર્યં(ઙ્), કિં સત્યમૃતમુચ્યતે .

કસ્ત્યાગઃ(ખ્) કિં(ન્) ધનં(ઞ્) ચેષ્ટં(ઙ્), કો યજ્ઞઃ(ખ્) કા ચ દક્ષિણા .. ૨૯..

સત્ય + મૃત + મુચ્યતે

પું(મ્)સઃ(ખ્) કિં(મ્)સ્વિદ્ બલં(મ્) શ્રીમન્, ભગો લાભશ્ચ કેશવ .
કા વિદ્યા હ્રીઃ(ફ્) પરા કા શ્રીઃ(ખ્), કિં(મ્) સુખં(ન્) દુઃખમેવ ચ .. ૩૦..

કઃ(ફ્) પણ્ડિતઃ(ખ્) કશ્ચ મૂર્ખઃ(ખ્), કઃ(ફ્) પન્થા ઉત્પથશ્ચ કઃ .
કઃ(સ્) સ્વર્ગો નરકઃ(ખ્) કઃ(સ્) સ્વિત્, કો બન્ધુરુત કિં(ઙ્) ગૃહમ્ .. ૩૧..

ક આઢ્યઃ(ખ્) કો દરિદ્રો વા, કૃપણઃ(ખ્) કઃ(ખ્) ક ઈશ્વરઃ .
એતાન્ પ્રશ્નાન્ મમ બ્રૂહિ, વિપરીતાં(મ્)શ્ચ સત્પતે .. ૩૨..

વિપરી + તાં(મ્)શ્ચ

શ્રીભગવાનુવાચ

અહિં(મ્)સા સત્યમસ્તેય-મસં(ઙ્)ગો હ્રીરસં(ઞ્)ચયઃ .
આસ્તિક્યં(મ્) બ્રહ્મચર્યં(ઞ્) ચ, મૌનં(મ્) સ્થૈર્યં(ઙ્) ક્ષમાભયમ્ .. ૩૩..

હ્રીર + સં(ઞ્)ચયઃ

શૌચં(ઞ્) જપસ્તપો હોમઃ(શ્) શ્રદ્ધાઽઽતિથ્યં(મ્) મદર્ચનમ્ .
તીર્થાટનં(મ્) પરાર્થેહા, તુષ્ટિરાચાર્યસેવનમ્ .. ૩૪..

તુષ્ટિરા + ચાર્ય + સેવનમ્

એતે યમાઃ(સ્) સનિયમા, ઉભયોર્દ્વાદશ સ્મૃતાઃ .
પું(મ્)સામુપાસિતાસ્તાત, યથાકામં(ન્) દુહન્તિ હિ .. ૩૫..

ઉભયોર્ + દ્વાદશ, પું(મ્)સા + મુપાસિતાસ્ + તાત

શમો મન્નિષ્ઠતા બુદ્ધેર્-દમ ઇન્દ્રિયસં(યઁ)યમઃ .
તિતિક્ષા દુઃખસં(મ્)મર્ષો, જિહ્વોપસ્થજયો ધૃતિઃ .. ૩૬..

મન્ + નિષ્ઠતા, જિહ્વો + પસ્થ + જયો

દણ્ડન્યાસઃ(ફ્) પરં(ન્) દાનં(ઙ્), કામત્યાગસ્તપઃ(સ્) સ્મૃતમ્ .
સ્વભાવવિજયઃ(શ્) શૌર્યં(મ્) સત્યં(ઞ્) ચ સમદર્શનમ્ .. ૩૭..

કામત્યા + ગસ્તપઃ(સ્)

ઋતં(ગ્) ચ સૂનૃતા વાણી, કવિભિઃ(ફ્) પરિકીર્તિતા .

ક*ર્મસ્વસં(ઙ્)ગમઃ(શ્) શૌચં(ન્), ત્યાગઃ(સ્) સં(ન્)ન્યાસ *ઉચ્યતે .. ૩૮..

કર્મસ્ + વસં(ઙ્) + ગમઃ(શ્)

ધર્મ *ઇષ્ટં(ન્) ધનં(ન્) નૃણાં(યઁ), *યજ્ઞોઽહં(મ્) ભગવત્તમઃ .

*દક્ષિણા જ્ઞાનસ*ન્દેશઃ(ફ્), પ્રાણાયામઃ(ફ્) પરં(મ્) બલમ્ .. ૩૯..

ભગો મ ઐશ્વરો ભાવો, લાભો *મદ્*ભક્તિરુત્તમઃ .

*વિદ્યાઽઽત્મનિ ભિદાબાધો, જુ*ગુપ્સા હ્રીરકર્મસુ .. ૪૦..

મદ્ + ભક્તિ + રુત્તમઃ

શ્રીર્ગુણા નૈરપેક્ષ્યાદ્યાઃ(સ્), સુખં(ન્) દુઃખસુખાત્યયઃ .

દુઃખં(ઙ્) કામસુખાપેક્ષા, *પણ્ડિતો *બન્ધમોક્ષવિત્ .. ૪૧..

નૈ + રપેક્ષ્ + યાદ્યાઃ(સ્)

મૂર્ખો દેહાદ્યહં(મ્) *બુદ્ધિઃ(ફ્), *પન્થા મન્નિગમઃ(સ્) સ્મૃતઃ .

*ઉત્પથ*શ્ચિત્ત*વિક્ષેપઃ(સ્), સ્વર્ગઃ(સ્) સત્ત્વગુણોદયઃ .. ૪૨..

મન્ + નિગમઃ(સ્) , ઉત્પથશ્ + ચિત્ત + વિક્ષેપઃ(સ્)

નર*કસ્તમઉન્નાહો, *બન્ધુર્ગુરુરહં(મ્) સખે .

ગૃહં(મ્) શરીરં(મ્) મા*નુષ્યં(ઙ્), ગુણાઢ્યો હ્યાઢ્ય *ઉચ્યતે .. ૪૩..

બન્ધુર્ + ગુરુ + રહં(મ્)

દ*રિદ્રો યસ્ત્વ*સ*ન્તુષ્ટઃ(ખ્), કૃપણો યોઽજિતેન્દ્રિયઃ .

ગુણેષ્વ*સક્તધીરીશો, ગુણસં(ઙ્)ગો વિપર્યયઃ .. ૪૪..

યસ્ત્વ + સન્તુષ્ટઃ(ખ્), ગુણેષ્વ + સક્તધી + રીશો

એત *ઉદ્ધવ તે *પ્રશ્નાઃ(સ્), સર્વે સાધુ નિરૂપિતાઃ .

કિં(વઁ) વર્ણિતેન બહુના, *લક્ષણં(ઙ્) ગુણદોષયોઃ .

ગુણદોષદૃશિર્દોષો, ગુ*ણસ્તૂભયવર્જિતઃ .. ૪૫..

ગુણદો + ષદૃશિર્ + દોષો , ગુણસ્તૂ + ભય + વર્જિતઃ

**ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(મ્)સ્યાં(મ્)**
**સં(મ્)હિતાયામેકાદશસ્કન્ધે એકોનવિં(મ્)શોડધ્યાયઃ .. ૧૯..**

**ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે**
**પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.**
**ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ.**

